हहरस्वर्णधेनुदानविधिः॥ ७॥ अथ क्रमशो ऽस्य प्रमेहरोगस्य सनिदानं चिकित्सित
माह॥ कृषिनिष्ठयास॥ आस्यासुखं स्वप्नसुखं दधीनि ग्राम्योदकानूपरसाः पयांसि ८५

नवान्नपानं गुडवैकृतं च प्रमेहहेतुः कफकृच्च सर्वं॥ मेदश्च मांसं च शरीरजं च क्लेदं कफो
वस्तिगतं प्रदूष्य॥ करोति मेहान् समुदीर्णमुष्णैस्तानेव पित्तं परिदूष्य चापि॥ क्षीणेषु दोषेष्व
वकृष्य धातून् संदूष्य मेहान् कुरुतेनिलश्च॥ साध्याः कफोत्था दश पित्तजाः षट् याप्यान
साध्याः पवनाच्चतुष्कं॥ समक्रियत्वाद्विषमक्रियत्वान्महात्ययत्वाच्च यथाक्रमं ते॥ कफः सपि
त्तः पवनश्च दोषा मेदोस्रशुक्राम्बुवसालसीकाः॥ मज्जा रसौजः पिशितं च दूष्याः प्रमेहिणां विंश
तिरेव मेहाः॥ दंतादीनां मलाढ्यत्वं प्राग्रूपं पाणिपादयोः दाहश्चिक्कणता देहे तृट् स्वाद्वास्यं च
जायते॥ सामान्यं लक्षणं तेषां प्रभूताविलमूत्रता॥ दोषदूष्याविशेषेपि तत्संयोगविशेषतः॥
मूत्रवर्णादिभेदेन भेदो मेहेषु कल्प्यते॥ शराविका कच्छपिका जालिनी विनता लजी॥ मसू
रिका सर्षपिका पुत्रिणी सविदारिका॥ विद्रधिश्चेति पिडिकाः प्रमेहोपद्रवा दश॥ संधिमर्म्मसु
जायंते मांसलेषु च धामसु॥ अथ वक्ष्ये संग्रहाल्॥ शरावीमाककोद्रवो हालगोभ्रमवणकाढकी

कलिङ्गाश्चदिता नोज्ये पुराणा मेहिनां सदा॥ मेहिनां तिक्तशाकानि जांगलान्हरिणांडजाश्च
वान्नविलेतीः मुद्गाःचणास्यंतिशालिषष्टिका॥ पारियात्रजयानिंबवन्हिगायत्रिणी ह्यकृ॥पा
ठायाः सप्तुडापीत वरपाःशारदस्यवापले न्नमध्यसिकता वालेर्त्तवणाविह्लिका॥ सोद्रमेदानु
क्रमानुष्ठं निकाथाःश्रेष्टाःसमाक्षिकाः॥ त्रिफलादारुदार्व्यब्दकाथःक्षौद्रेणमेहहा॥ निशा
कल्कयुतो धात्रीरसो वा माक्षिकान्वितः॥ मधुना त्रिफलाङ्गसे मधवद्रमजन्नकवांकटंकाद
री त्रिफला चित्रकेष्वसामेःकृतःकाथःक्षौद्रेण पातव्यःप्रमेहाणां विनाशनः॥ फलत्रिकं
दारुनिशां विशालां मुस्तां च निकाथ्य निशां सकल्कां॥ पिबेत्कषायं मधुसंप्रयुक्तं सर्वप्रमेह
क्षयकृल्लिखेष्ठा॥ न्यग्रोधोडुंबराश्वत्थश्योनाकारग्वधासनाः॥ आम्रं कपित्थं जंबूं च पियालं क
कुलं धवं॥ मधुकं रोध्रं वरुणं पारिभद्रं पटोलकं॥ मेषशृंगी दंती चित्रक माढकं करंजं त्रि
फला शक्र भल्लातक फलानि च॥ एतानि समभागानि श्लक्ष्णचूर्णानि कारयेत्॥ न्यग्रोधादि

१५०

मिमं चूर्णं मधुनासह लेहयेत्॥ फलत्रयरसं चानुपिबेत्तु लनमूत्रं विशुध्यति॥ एतेन विंशति मेहा
नूत्रकृच्छ्राणि यानि च प्रशमं यान्ति योगेन पिटिका न च जायते॥ इति न्यग्रोधाद्यं चूर्णं॥७॥
मासि शुक्रे शुचौ वापि शिलाः सूर्यांशुतापिताः॥ ततः स्रवति यत्तस्याः स्वरसं शिलाजतुप्रवेदिनि॥ शिला
जित्रिविधं ख्यातं महाव्याधिविनाशनं॥ तत्त्रयं च समं मलं स्निग्धं निःशर्करं च यत्॥ गोमूत्रगंधि
तं यापि नत्वस्मनं पचदक्षालोत्मा रक्तालादिका थेन तद्विपेयं यथाबलं॥ जांगलेन रसे नान्नं त
त्रिशस्ये जोजनं मासमेकं प्रयोक्तव्यो रसायनो महोजोयहः॥ विनाश्य मधुमेहाख्यं आ
तंकं रोगसंकरं॥ कांतिवर्णबलोपेतं शतं जीवस्य नामयः॥ द्विषिमस्य कलत्थाश्च कपोतांश्च
विवर्जयेत्॥ ७॥ इति मधुमेहे शिलाजतुप्रयोगः॥ ७॥ त्रिकंटकाश्मंतकसोमवल्को भल्लात
के:मातिविषो सलोध्रैः॥ वचापटोलार्जुननिंबमुस्ता हरिद्रयापद्मकदीप्यकैश्च॥ मंजिष्ठ
पाठागरुचंदनैश्च व्यस्तैः समस्तैश्चककफवालजे स्युः॥ मदहलालेल्लं विपचेत्घृतं ऊर्ध्वांदुमि

श्रं त्रिफलरसेऽष्टु॥ इति त्रिकंटकाद्यं घृतं तैलं यमकं वा॥ सशर्करा धात्री टंकाः साधयेद्धो फ
वक्रिषक्कोपचकावि किसे दुग्ण वर्षे सांपाने ष्टु शस्यते॥ कायावसपते वर्या न्यंती स्कंधं वंच
शोधनं एलादिकेन कुर्वीत तैलं च व्रणरोपणं॥ सौवीरकं सुशं सुक्तं तैलं क्षीरं घृतं श्र
मोक्तु रससोपि दुग्धान्यानू पानि च वर्जयेत्॥ वल्लयोषफलत्रिक त्रिलवणाद्दिक्षार वत्यानल
रूपामापिप्पलि मूलमुस्तक सठी माक्षीक धान्य वचा षड्ग्रंथामरदारु वारुणकणा ह्नं निंब
दंती निशा पाठैला निविषो पिष्टु प्रमितयो लौहस्य कर्ष इक्कं चक कद्दीरी पलिका गुरादज्ञा
पलान्याज्ञो शिलाजत्मनो मीनां डीकउ वो नि नेति गुटिका संयोज्य कुर्यात् त्रिषकूता द्वे
कं फलिया सरं सहाविषाद्दोदूपालित्यादिनां॥ तक्रं मन्मथु पयो रसं मधुनं ततः सा वृत्तिषन्मा
त्रयोगः सांसि प्रदरं दारं सुविषम नाडीव्रणानश्मरीकृच्छं विद्रधि मग्निमांद्यमुदरं पांडामयं
कामलां च स्रावांसरां गंदरं सुषिटिका गुल्मप्रमेहारु चीरतो दोषमुरः क्षतं कफ मरुत्पित्ता

८१

त्रिमुरां जयेत्॥ हृद्रसं जनये तक्रवा न मसो जस्कं बलं च हृदयत्॥ एतस्यां न विनिषिद्धमत्र
समस्तनूनि भोगमं मैथुनं॥ विख्याता गुटिकेयमं चितशचंद्रप्रभा नामतः सां आनंदकरी कारा
ति वरुचिचं द्विणत्वं चतुः॥ इति चंद्रप्रभा गुटिका॥ ७॥ इति श्रीवीरसिंहावलोके प्रमेहमधुमे
हपिटिकाधिकारः॥ ७॥ ॥ अथ मेदोरोगस्य ज्योतिः शास्त्रात् प्रायेणहेतुमाह॥ यथोक्तं
जातके॥ स्वरावसं स्वरविनं स्थलं पतितं मिष्टाशिनं च गोस्तनयं शयनोपचारकशालं
हादस्रागः श्री जितं जनयेत्॥ व्ययतावगतः सुकृत निन मेदः प्रशमनार्थं सूर्यविधानं वि
धेयं॥ ७॥ अथामदोरोगस्य कर्मविपाके हेतुमाह॥ नव्यतीकारं च॥ दधिचोर्येण तु रुषोजा
यते मेदसा युतः॥ दधिधेनुः प्रदातव्या॥ तेन विभाय मुह्वयो एकं लक्षं वा कर्यात्॥ ७॥ अथ
कनमानस्य मेदोरोगस्य सनिदानं चिकित्सितमाह॥ रुच्चिनिष्ययात्॥ अथायामदिवा
स्वप्नश्लेष्मलाहारसेविनः॥ मधुरान्नरसस्वादु प्रायः स्नेहान्मेदो विवर्द्धते॥ मेदोमांसानि

हृद्ययातु स्थूलास्फिक् उदरस्तनः॥ अथयथोपवयोः साधनात्राति स्थूलत्वउच्यते॥ अथदेह
संग्रहात॥ पुराणाः शालयो मुद्गाः कुलत्थोद्दालको यवाः॥ लेखनो बस्तयश्चैवं संखवा
मदिनासदा॥ श्रमचिंताव्यवायश्च क्षौद्रं वारिलघियः॥ हंत्यवश्यातिस्थौल्यं यावश्यामाक
भोजनो प्रातर्मधुयुतं वारि सेवितं स्थौल्यनाशनं॥ सचव्यजीरकाव्योषहिंगुसौवर्चलानला
मस्तुना सक्तवः पीता मेदोघ्ना वह्निदीपनाः॥ क्षारं वा तालपत्रस्य हिंगुयुक्तं पिबेन्नरः मे
दोवृद्धिविनाशाय तत्किमंड समच्चितं पत्रांबुलोद्धा नयचंदनानां॥ शरीरदौर्गंध्यहरः
प्रमेहः वा सादरसोपेतः शंखचूर्णेन संयुतः॥ बिल्वपत्ररसो वापि गात्रदौर्गंध्यनाश
नः॥ हरीतकी लोध्रं अरिष्टपत्रं जंबूपत्रं वा दाडिमवल्कलं वा॥ पांगरोगः कथितोंगनानां जं
तु कषायस्य नराधिपाणां व्योषाग्निमुस्तात्रिफलाविडंगं गुग्गुलं समांस्वादे सर्वानृ क्षये
धाविन्मेदः श्लेष्मामवातजान्॥ इति श्रीवीरसिंहावलोके मेदोधिकारः॥ ७॥ ॥ अथ १८२

ज्योतिःशास्त्रानि प्रायेणोदररोगस्य हेतुमाह॥ तत्र तीकारं वा॥ तयोः कं जातको॥ सिंह
स्थो हि जनाष्टकरातिजालं रदनं जठररोगार्त्तं स्त्रीद्वेषिणं च पुरुषं तथा पिपासादुःखवि
ष्टौ॥ अन्यच्च॥ कृशास्थी स्फीतरोमा पृथुवदनगलोरुस्वपिंगाक्षियुग्मस्त्रीद्वेषिक्षुत्पिपासा
जठरगदरुजापीडितो मांसलुब्धो पांडुस्ती क्रोधल्पपुत्रो विपिननगरुविमोटच वपःखव
ता विक्रांतो कार्यकोपः शशिनि च तरविनेगनेगंती रहष्टिः॥ अपरं चा॥ चतुरामित्रस्त्रीस्ति
घ्नेडकाय्याग्निर्मंदः … षष्ठो वोदररोगेः पीडितादेहः मानवतिगंडोदरा
दिरोगाः स्फः पाशबंधनकं … ॥ उत्पात … अपक्षेवोयदा … गतारविः स्त्री एवं
प्रांतरच्छाया मध्येवो सिंहांशस्थितचंद्रजनितोदररोगोपशांतये चंद्रप्रीतये भागु
कमेव कुर्यात्॥ तथा चोपस्थलानस्थिते चंद्रे ध्येवो॥ अप … रदशायां नवर्तितास्करि
जनितोदररोगोपशमनाय सर्वथा नुप्रीतये जपादानादिकं कुर्यात्॥ ७॥ अथोद

र रोगस्य कर्म्मविपाको ह्युमाह ॥ तत्प्रतीकारं च ॥ योऽन्नं त्वविस्तु महेश्वराणा उत्तमं त्वावन
त्वदं साधयति ॥ स उदरव्याधिमान् नवति ॥ तत् शांतये तु कृच्छ्रातिकृच्छ्रं चांद्रायणानि कुर्यात् ॥
अभा महेश्वरस्य सहस्रकलशाभिषेकं कुर्यात् ॥ उद्युन्नद्येति ऋचमयुतं जपेत् ॥ आते
लिप्तकेन चरुर्ह्हीतमष्टोत्तरसहस्रं तु कुर्यात् ॥ मधुहृतं स्तु तं हिरण्यं दद्यात् ॥ धर्म्मानि
श्चयार्थं स्वामिना कृतस्य ततोऽप्य मावरतः प्राड्विवाकस्य मंत्रिवाक्यो हरिवंतस्य प्रा
यश्चित्तं मासत्रयं पयोव्रतं शतब्राह्मणभोजनं च कारयेत् ॥ महादेवस्य महस्रकल
शाभिषेकं कुर्यात् ॥ इति जलोदरपद्मपुराणे उदरव्याधियुक्तस्तु नवेत् ॥ गुर्वंगनागम
नेनो शयरणं कुर्यात् तस्य पापस्य शांतये ब्रोहायनः ॥ कुर्यात् सकरं समध्यकेशा जलं ताम्र
मवचोपक नक्षेण्हा न्यौरतायेकेण तयाशु नो ॥ घुष्टेरतानि दयानि कटिं च पेणका
रयेत् ॥ तेत्रेस्त्वर्म्मयेकार्यं जिह्वारीत्या प्रकल्पयेत् ॥ पादयोः प्रक्षिप्य तत्र तत्पात्रे पुनर्द्द ८३

प्यास्ते जलवस्त्रेण संवेष्ट्य चंदनागरुचर्चितां ताम्रपात्रे स्थापयेन्मकरं शुभं तो ॥
ब्राह्मणं हृष्टसंपन्नं हृदं दद्यां मन्त्रोक्तुपां वाक्येः कर्ककेशरेः तन्त्र येदं गुलीयाके ॥ द्वाम
वरुणादेवतायैः मंत्रात् ध्यायोक्तमार्गतः ॥ ततश्चोदरिको विप्रे मकरं विनिवेदयेत् ॥ जलाधिदे
वदेवेशपश्चिमाशापते विभो ॥ उदरव्याधिना त्रां मे कुरु दानेन तोषितः ॥ इति जलोदरमक
रदानविधिः ॥ ७ ॥ अथ कमलापाकस्योदररोगस्य निदानं चिकित्सितमाह ॥ रुग्विनिश्चयात् ॥
रोगाः सर्वेऽपि मंदाग्नौ सुतरामुदराणि च ॥ अजीर्णान्मलिनैश्चान्नैर्जायंते मलसंचयात् ॥
रुध्वा स्वेदांबुवाहीनि दोषाः स्रोतांसि संचिताः ॥ प्राणाग्न्यपानान् संदूष्य जनयंत्युदरं
नृणां तत्र सर्वं रूपं बलवर्णकांक्षावलीविनाशो जठरावाजीर्णपरिज्ञानविदाहयुक्तात्व
त्वो रुजः पादगतश्च शोफः ॥ आध्मानं गमनेऽशक्तिर्दौर्बल्यं दुर्बलाग्निता ॥ शोफस
दनमंगानां संगो वातपुरीषयोः ॥ दाहस्तंद्रा च सर्वेषु जठरेषु भवंति हि ॥ पृथग्दोषैः सम

८५

स्त्रैश्च जीर्णबद्धस्रुतोदकैः ॥ संजयंत्युदराण्येषां लिंगं पृथक् पृथक् ॥ श्रुणु तान्यति
लापस्थमपत्रमन्नतनुत्वचो बलशोणितमांसाग्निपरिक्षीणं च वर्जयेत् ॥ उदरसंग्रहः ॥
रक्तशालिर्यवा मुद्गा जांगलाश्च रसा हिताः ॥ विरेकास्थापनं शस्तं सर्वेषु जठरेषु च ॥ द्वाराले
रंडजं तैलं पिबेन्मूत्रेण वा सरक्तोऽपि निष्कृत्या ॥ पिबेत्तैलं पयस्सार्द्धं दिने दिने ॥ सर्वत्रोप
दारस्य प्रकृतं मुत्र्यस्तमानकौ ॥ वातोदरी पिबेत्तक्रं पिप्पलीलवणान्वितं ॥ शर्करामरिचोपे
तं स्वादु पित्तोदरी पिबेत् ॥ यवानीसैंधवाजाजीव्योषयुक्तं कफोदरी ॥ तक्रं त्रिकटुकक्षारं सैंध
वं स्नुहीपयोन्वितं तंडुलज्वास्थि विनिर्मितं चूर्णं ॥ उदरमुदरं हन्यात् योगोऽयं संस
रात्रेत ॥ स्नुहीपयोभावितानां पिप्पलीनां पयोऽनुतः ॥ सहस्रमुपयुंजीत त्वाक्तितो जठराम
यी ॥ मुक्तो रोगाच्चिरंजीवेत् बलवर्णसमन्वितः ॥ पिप्पलीवर्द्धमानं वा कल्पदृष्टं प्रयोज
यतां जठराणां विनाशाय नास्ति तेन समं भुवि ॥ त्रित्रिरथपरिवृद्धं पंचभिः सप्तभिर्वा ॥

१८४

दशभिरथविवृद्धं पिप्पलीवर्द्धमानं ॥ इति पिबति पयो यस्तस्य न श्वासकासज्वरजठर
गुदार्शोवातरक्तक्षयाः स्युः ॥ पटोलमूलं रजनी विडंगं त्रिफलां त्वचं ॥ कंपिल्लकं नीलिनीं च
त्रिवृतां च तिलांशं समं ततो ॥ षडाद्याः कार्षिकान् भागान् पंचवह्निस्त्रिचतुर्गुणान् कृत्वा चूर्णं समं ततो
मुष्टिं गवां मूत्रेण पिबेत् ॥ विरिक्तो जांगलरसैः भुंजीयान्मृदुभोजनं ॥ मंडं पयांप्पवपी
त्वा त्र्यहं पयः ॥ षण्मासं त्वं पिबेत्तक्रं सर्वं पिबेदेवं ततः क्रमात् ॥ हंति सर्वोदराण्येव
शूलं जालोदकान्यपि ॥ कामलं पांडुरोगं च श्वयथुं चापकर्षति ॥ इति पटोलाद्यं चूर्णं ॥ ॥
सवारद्युषा धान्यं त्रिफला सोपकुंचिका ॥ कारवी पिप्पलीमूलमजगंधा सठी वचा ॥ शतावरी
जीरकं व्योषं स्वर्णक्षीरी ससचित्रका ॥ द्वौ क्षारौ पौष्करं मूलं कुष्ठं लवणपंचकं ॥ विडंगं च स
मांशानि दंती भागत्रयं तथा ॥ त्रिवृद्विशाले द्विगुणे सातला स्याच्चतुर्गुणा ॥ एष नारायणो
नाम चूर्णो रोगगणापहः ॥ एनं प्राप्य निवर्त्तंते रोगा विष्णुमिवासुराः ॥ तक्रेणोदरिभिः पे

यः शुक्तिभिर्निर्बद्धरां बुना न्यानद्रवाणे स्वरयावा तारागे प्रसन्नया॥ दधिमंडेन विश्लेगदा
डिमांबुभिरर्शसितगंदारपांडुरोगे कासेश्वासे गलग्रहोरुरोगे ग्रहणी॥ दापेके हेमंरे
नलेहा॥ दृष्टविषे मूलविषे संगास्थित्रिमे विधेयया॥ स्निग्धकोष्ठेन पेयमेतद्धि रेचनं॥
दंतीत्रिफला पाठा दंतीकटुकारोहिणी॥ चतुरंगुलमज्जाजीवनथा चकटुकत्रयां चित्रकं च
हृद्दात्यान्त तथाजयपिप्पली॥ स्नुहीक्षीरपलं दद्यात् चूर्णस्यार्धं प्रदापयेत्॥ यावन्तो बिंदवस्ति
तद्विंदून ता वारान्गाहिरिच्यते॥ एतद्बिंदुघृतं सिद्धं रुग्णभिः समुदाहृतं॥ इति बिंदुघृतं॥ बा
पीतः प्लीहोदरं हंति पिप्पलीमरिचान्विता॥ अम्लवेतससंयुक्तः त्रिशुंठीक्वाथः सासे धवचा
पाठाक्षारतोयेन नाविता पिप्पली मृता॥ गुल्मप्लीहोदरं हंति वा द्विदीपनकारिका॥ अर्कप
त्रं सलवणं छुददग्धं शुंठनस्रितां निहंति मधुना पीतं प्लीहानमतिदारुणं॥ शिरस्यं घापमूल
कल्कः पीतस्तक्रेण नाशयत्यचिरात्॥ चिरंतनकालस्य समुत्थं प्लीहानं रूढयवगाढं॥ ८५

हरीतकीनागरदेवदारु पुनर्नवा छिन्नरुहा कषायः॥ सगुग्गुलो मूत्रयुतश्च पेयः शोफोदरा
णां प्रवरः प्रयोगः॥ हरीतकीनया सुंठी पिबेन्मूत्रेण शाकितः॥ सर्वोदरहरं प्लीहमेहार्शः कृमि
गुल्मकं॥ पातवा शुक्तिलिं क्षारं क्षीरेणोदधि शुक्तिजं॥ पयसा वत्सयोः कृत्वा पिप्पली प्लीहगां
ता यवरण्डतैलं दत्वा मूत्रं निश्रां त्रिफलारसो वा निहंति वातोदरशोफशूलं॥ का
यन्मस्तुदोदरशूलजो वा॥ गोमूत्रयुक्तं महिषीपयश्चोदीरं गवां वा त्रिफलाविमिश्रं क्षीरान्न
भुक्के चलमेवगव्यं मूत्रं पिबेद्वाच्छ्युदरेषु॥ उदकाद्रूपजं मांसं शाकं पिष्टकृतं तिलां गव्या
यामाध्वदिवास्वप्नयानानि संविवर्जयेत्॥ तथोष्णलवणाम्लानि विदाहीनि गुरूणि च॥ नाद्या
दन्नानि जठरी तोयपानं च वर्जयेत्॥ इति श्रीवीरसिंहावलोके उदरप्लीहोदरशोफोदराधि
कारः॥ ७॥ ॥ अथ श्वयथुरोगस्य ज्योतिःशास्त्राभिप्रायेण हेतुमाहोत्र प्रतीकारश्च॥ नी
चस्थभ्रष्टद्वशायां श्वयथुर्ग्रस्य कर्म॥ रोगाश्च ... तिदर्शनात्तोन्न प्रतीकारार्थं हुतं स्यात् प्रीतये ज

पाद्दोमादिकं सकलमपिकार्यं॥ब॥ अथ यक्षुरोगस्य कर्मविपाकान्निप्रायेण हेतुमाह॥
तन्त्रतीकास्वे॥मार्गे भुलिनेपर्वताग्रेकणिछायामधिरूढविशोभुंचनोतत्रहीवति॥ आमवा
तस्थयक्षुरोगीयमानोनिवांसूर्छितानवतिपर्वताग्रंनदीतीरंछायामारूढवानरः॥मूत्रंपुरी
षमथवायुःप्रयच्छतिवाजलेस्थयक्षुव्याधिमाप्नोतिइत्याहभगवान्शिवः॥मरुदेवोविश्वतःशा
रीरव्यादिनाग्रहोत्तरशतायुतत्रयंजपंकुर्यात्॥आपोहिष्ठामयोभुवइत्यनेनचरुघृतान्ना
मष्टोत्तरायुतंशतत्रयंहोमंकुर्यात्॥अत्रव्याधिगुरुलघुभावोप्रायश्चित्तगुरुलघुभावो
हष्टव्यो॥तथाचवृद्धबौद्धायनः॥विद्युत्कर्तानमोक्तृणांशोफीभवतिमानवः॥तस्यकर्मवि
पाकोव्याधिनाशानांदानैर्वक्ष्यामिशेषतःसर्वशोफविनाशानां॥होमवस्त्रंसमानीय
बकुसूत्रंचयत्नेनवेत्॥मुक्ताफलानिबश्रीपात्रवस्त्रप्रांतेसमंततः॥कुंकुमेनांकितंसमा
ककर्शेरागरूपिनिरंदुलोपरिसंस्थाप्यतंडुलाश्चस्वशक्तितः॥उपचारैःषोडशभिः॥

संपूजयेत्ततः॥सुवासवाससीइतिमंत्राभ्यांभजनंचतताविदुः॥सुवंवस्त्रापीत्येकेसु
वसुवासाइत्यपरामंत्रः॥होमंचापिप्रकुर्वीतसमिदाज्यतिलैरपि॥उदुत्यस्वरदंविष्णुःसप्त
र्षिमंत्रैःक्रमेणतुकुर्यात्॥स्विष्टकृदाद्यपदस्यकर्मणाशरीरवमितिमंत्रेणहोमः॥कुर्वाथ
सहस्रवाननंबपात्रेसर्वाग्निखस्पद्धासंख्याचाष्टोत्तरशातमष्टाविंशतिरेववासंपातेनां
गमार्जनं सर्वामयविदारागिणः॥अर्द्धीत्यामिनिरुक्तेनयथालिंगंतथैवहि॥वाससामाज
नंकुर्यात्सयाजीदत्तमुद्रिका॥आचार्यायतुमंत्रदत्तंदद्यात्सोपिसदक्षिणां॥मंत्रेणानेनवि
धिवत्तादक्षिणान्मुखःसुधीः॥ब्राह्मणानांप्रवालागस्त्योलोपामुद्रापतिःप्रभुः॥होमवस्त्रप्रदा
नेनतुष्टोथाधिव्यपोहतु॥दानमंत्रः॥ब्राह्मणेभ्यस्त्रयोन्येभ्योदद्याच्छक्त्याचदक्षिणां॥त
तःस्नानंस्मृतिविर्धिवाचवस्त्रमाल्योपशोभितः॥ब्राह्मणान्वेष्टजातिःसार्द्धंभुंजीतानीवशक्तितः॥
इतिशोफकरहोमदानविधिः॥श्री॥अथकम्पवातस्यशोफरोगस्यनिदानंचिकित्सितमाह॥

रुचिनिरुद्धयाना॥रक्तपित्तकफाढ्यस्तु इष्टोढ्यान् वह्निः॥शिरानु।नीचारुह्यतिरस्त्रेर्हिक्रुध्या
त्वङ्मांससंश्रयां सोऽमेधं संहतं शोफं तु माकुर्निचयादथोत्सर्वैरात्तु विशाधस्तु रूपत्वेद्दं
नवात्मकां दोषेः पृथक्द्वयेः सर्वैरन्तिघाताद्विषादपि तत्त्वर्वं रूपंद वक्ष्युः॥शिरायामां
गागोरवांस्त्रध्यामयात्तक्रटाचावलानां दारान्लती।हृत्काम्ल युक्तरूपसेवादध्या मधिकृष्टं
गराशगपष्टुष्टान्ननिषेवणं वा त्रयोंसिवेष्टानवद्दस्युद्भिम नोपि घातोविषमात्रस्तति।
निष्योपचारः प्रतिकर्मणां च नियताह्ह॥ श्वयथुपद्दिष्टा। ऊर्ध्वगामी नरेपन्ना न धोगा
मी सुखावान् स्त्रियः॥ ७ नयंवस्तिसंजातः त्वाफो हंति नसंशयः॥ छर्दिश्वासोरुचिस्तृष्णाद्दा
रातीसारएवञ्चासप्तकोयं सादोर्बल्यः॥ त्वाफोपद्रवसंग्रहः॥ अथ दंदसंग्रहान्॥ स्वुंदीप्त
नर्नांवेरंडपंचमूली त्रिवृंतंजलं वातिकश्वयथौ घोरा स्वंपानाद्दरपरिग्रहा॥ पटोलत्रिफलारि
ष्टदार्वीकाथः सगुग्गुलुः॥ हंतिपैत्तिकं तलं चोफंतं ह्लाद्दारसमन्वितं॥ त्वाफेकफोछेमहिषा श्व०७

दृष्टमूत्रं सदंपिवेद्वा सलिलंनाथवी काफ उक्त्वाद्दि कवा उराणपिण्पाकत्रिसु त्रकजः
प्रलेपः॥ गुडार्द्रकं वा गुडनागरं वा गुडाभयां वा गुडपिप्पलीं वा॥ कषांतिहृद्धा त्रिफलाप्रमाणं
रवाद्दत्ररूपक्षमयापि मासौ शोफप्रवेति ढपायगलास्यरोगान् सश्वासकासारुचिपीनसादीन्
जीर्णज्वरार्शोग्रहणीविकारान्हन्यात्तु यान्पानकफवातरोगा तां॥ आर्द्रकःस्वरसंपीतः
पुराणगुडमिश्रितः॥ अजाक्षीराशिनां शीघ्रं सर्वशोफहरो भवेत्॥ त्रलामिविश्वघनजी
रककंटकारीपाठानिशाकरिकणामगधाजदानां द्वर्मेकवोष्णसलिलेन विजोच्यपीतं
नातःपरं श्वयथुरागहरं नराणां॥ द्विपंचमूलस्य तुलाकषाये कंसेन यानांच शतंगुडा
च्चालोह्य सुसिद्धे चविनीय ब्रूर्ण्येयाषं त्रिसंगधेमा यास्तु शीतं प्रस्थार्द्धमात्रं मधुनः सुरीते
किंचिच्चसीलतयावलेहकां॥ एकानयां प्रातरपत्ततश्च लेहान्नरस्तु किं निहंति श्वयथुं प्रवृद्धं॥
श्वासंज्वरारोचकमेहगुल्मा तु प्लीहत्रिदोषोदरपांडुरोगान् काशामयान्तम्र मूत्रगत्पित्तं
मे

एवकुक्ता रोगे सगे दरादेः सतशो मधुगो महाव रुद्रः ककर्टके दिन नाथे मे नगरि राङ्किते त्रवति।१४

त्येव स्पर्सिद्धत्रानिल शुक्र दोषान्॥ इति कंसस्त्रीवकी॥७॥ विदाहि चाम्लं लवणानि मद्यं मृदंदि
वास्वप्नम जांगलं चास्त्रियोद्य तैलानि लपयो गुरूणि॥ त्राफंजिद्यां सुस्थ रिवर्ज्जयच्च॥ इति श्रीवीरसिं
हावलोके चोफाधिकारः॥७॥ ॥ अथ ज्योतिः शास्त्रानि प्रायेण अंत्र कर्षण शुक्र रोगाणां
हेतु माह॥ तत्प्रतीकारं चौंयुक्तं॥ त्रुल्लिंगोस्त्यरो गार्त्तो मीनस्थे केतिदर्शनात्॥ कुलटाग ३४
र्यो द्वेषी वधनिष्टो दक्रूणोदरिद्रियी॥ छायिनि [illegible] सिते भवति पुमानू गृहीत झलिः स शुक्र गदः॥
शुक्र हसादिकं विधिवत्॥ अत्र आघ [illegible] न इति शुक्र पीडायां पिप्पलूंनो॥ नडुप शांतयो॥
कर्कि सोछिन मंगला वलोकिन सूर्यजनित शुक्र रोगोपशांतये पूर्ववत् जपहोमादिकं
कुर्यात्॥७॥ अथ वृषण रोगस्य कर्म्मविपाके हेतुमाह॥ तत्प्रतीकारं च॥ तत्र स्नुषा गामी वात
वृषणः॥ तस्य प्रायश्चित्तं असस्य दत्त्वा नाजव्वा चांद्रायणात् शुध्येत्॥ ज्ञानास्तुजमने त्र
स्याद्या शुद्धिः॥ अत्रासामेकां शुद्धि त्रिर्वं बजदिने सुगवा त्वनिं प्रविश्य मृतः शुध्येत्॥ अपरंच।
५८

अपराधं संतारणयोर्(नृपो) त्वादीनो हस्तपादादी छेदयति॥ तस्य तु शुक्रमग्निना दग्धमिव शिलापि
ष्टमिव सर्गांजायते पश्चाद्रुधिरं श्रवति॥ सरुद्रसंहितामध्ये ब्रह्मसहस्रं जपतां यतिवांद्रा
यणं कुर्यात्॥ गांच दद्यात्॥ जायते वृषणे यस्य व्याधिः परमदारुणः॥ जपित्वा दशसहस्रं
मुच्यते रुद्रसंहिताः॥ इति विष्णुवचनात्॥ इति वृषणव्याधि प्रतीकारः॥७॥ अथान्त्ररोगे विशेष
तयाकर्म्मविपाके हेतुमाह॥ तत्प्रतीकारं च॥ पूर्वजन्मनि वेशपदं तु रंध्राणि छिन्नानी यत्र
वंति॥ पश्चाद्दीनदारमपानदाहश्च भवति॥ शांतवाक्षणनोजनं च॥ उद्यत्सुधे सूर्ये च मद्युतत्र
यं जपेत्॥ ज्वालारोद्रस्त केन मधुहृताभ्यां जुकुयात्॥ अथवा मंदिर्भिर्तोव्रतिरूपं च दद्यात्॥ इ
ति सोपद्रवां त्रपीडायां वृषाणलक्षं चांयते विद्युक सूर्यामल्याजायते चांत्रवृद्धिमान् वदया
मित्र प्रतीकारं दानादामादिकर्म्मणा॥ कुर्यात् स्वस्य मयीमूर्त्तिं श्री नारायणस्य तु॥ यावं
तातिकनिष्काणि एकेनापि तदहतः॥ नारायणास्तु राणमुक्तं देमहस्ति रथदानं प्रदा

एतदुक्तं। रोगे गर्गादरादैः पातकी बंधुजिः महवि रुद्रः। कर्कटे दिननाथे ... मे तमिस्रातिते भवति। २१४

ऽवं सर्पिर्मूत्रानिलशुक्रदोषान्॥ इति कं सहरीतकी॥७॥ विदाहि चाम्लं लवणानि मद्यं मृदं दि
वास्वप्नमजांगलं च स्त्रियो द्रुतं तैलपयो गुरूणि। त्रापकं जि द्वां खुः परिवर्जयेच्च॥ इति श्रीवीरसिं
हावलोके चोपकाधिकारः॥७॥ ॥ अथ ज्योतिःशास्त्रात्रि प्रायेण अंत्रवृषणवृद्धिरोगाणां
हेतुमाह॥ तत्प्रतीकारं चाँ युक्तौ॥ नक्षिलासुस्त रोगार्तो मीनस्थे केतिदर्शनात्। कुलटाभा ३४
र्याद्वेषी वृषणनिष्ठो हृस्रणोदरि द्वेषी॥ ज्ञानिनि [illegible] सिते भवति पुमान् गृहीतबलिः स गुरुगदः॥
शुक्रपूजादिकं विधिवत् अत्र आद्य प्रवृद्धेन इति मुष्कपीडाद्योऽपि प्रवृत्ते॥ तदुपशांतये॥
ककरिसंस्थितमंगलावलोकितसूर्यजनितमुष्करोगोपशांतये भवे वतज पद्मोमादिकं
कुर्यात्॥७॥ अथ वृषणरोगस्य कर्मविपाके हेतुमाह॥ तत्प्रतीकारं च॥ तत्र स्नुषागामी वात
वृषणः स्यात् अस्य प्रायश्चित्तं असमर्थहज्ञानाज्ज्वा चांद्रायणात् शुध्येत्॥ ज्ञानात् सकृज्जमने त्र
यात्राशुद्धिः॥ आमासे कोष्ठ ... दिनं वर्षं वज्रादिने युगवा अग्निं प्रविश्य मृतः शुध्येत्। अपरंच।
५८

वृषे
अपराधं संतारणयो वै ब्राह्मणो हस्तपादादीं छेदयति। तस्य तु कामन्मिनादग्धमिव तिलापि
छलिवस पुनं त्रायतो पश्चात् रुधिरं स्रवति। सरुद्रसंहितामस्पो भरसहस्रं जपं त्रायति चांद्रा
यणं कुर्यात्॥ गां च दद्यात्॥ त्रायने हृषणे यस्य व्याधिः परमदारुणः। जपिताद्दशसहस्रं
मुच्यते रुद्रसंहिता। इति विष्णुवचनात्॥ इति वृषणव्याधिप्रतीकारः॥७॥ अथांत्ररोगे विशेष
तः तस्य कर्मविपाके हेतुमाह। तत्प्रतीकारं च॥ सर्वजन्मनि विशल्यदंतु संत्राणि छिन्नानि वन
वंति। पश्चाद्वीतदारमपानदाहश्च भवति। शांतश्राल्लणनोजनं त्रा उद्यचुद्येस्तु चमधुतत्र
यं जाप्त्वा भ्रातारोद्रसूक्तेन मधुद्भूतान्यांजु कुर्यात्॥ अथवा मदिरां ज्वलितं च दद्यात्॥ इ
ति सिपद्रवां त्रपीडायां ब्राह्मणोक्तं चायन्ते विद्युकर्त्रीयामन्यांजायते चांत्रवृद्धिमानवस्या
मित प्रतीकारं दानादमादिकर्मणा॥ कुर्यात् स्वर्णमयीं मूर्तिं श्रीमन्नारायणस्य तु॥ याव
दारिकनिष्कात्मांपरकेनापि तदर्द्धतः॥ नारायणलक्षणमुक्तं हेमस्तिरथदानोक्तदा

वक्रेहस्तगदापाणेःशमयाशुरुजाप्पतेः दानमंत्रः॥ एवंदत्वातुतांदेवींक्षमाप्यब्राह्मणंततः।८

स्थापयंवगृहेनस्नापयेत्कुंकुमोपरि॥ स्नानवस्त्रेणसंवेष्ट्यगंधमाल्यैःसमर्चयेत्उपचारैः
षोडशभिःशिरावायोविहितःस्मृतिः॥ सर्वधान्यान्यर्थितव्यज्ञोब्रह्मविद्यास्तुनिश्चितःतोदामंचक्रा
रयेत्तत्रस्थानेयथाविधिविशास्त्रतः॥ समिदाज्यतिलैश्चैव॥ ॐनमोनारायणायेतिवैतिला
न्याहुतिस्तिर्युक्तयानूरागीतथावर्ष्यदेवंनारायणममामयंमूलमंत्रेणविधिवत्तुनैवेद्यं
चरुरिष्यतेनन्नामनंनामामोकारंमूलमंत्रःप्रकीर्तितः॥ ततस्तांप्रतिमांदिव्यांब्राह्मणाय
उदङ्मुखः॥ मंत्रेणानेनविधिवत्तस्यापरमयामुदा॥ नारायणजगन्नाथशंखचक्रग
दाधरः॥ पूर्वजन्मनियज्ञादिविघ्नोद्यंकेतंममअंत्रवृद्धिमहारोगंदानेनानेननाशय॥ ततोपितः
विप्राणांभोजनंदद्यात्स्नात्वाभुंजीतवाग्यतः॥ एवंकृत्वासमाप्नोतिनीरोगत्वंनरोत्तुवि
चारात्मवृद्धकेनित्यंहिस्थविरंसुखमेधातो॥ इतिअंत्रवृद्धिहरनारायणदानं॥ ७॥ अथक
मप्राप्तस्यअंत्रवृद्धिरोगस्यसनिदानंचिकित्सितमाह॥ ७॥ रुक्गतिनिरुध्याताकाहात्हगतो एमए

वातुःशोफःस्थूलकःस्यरन्तुघ्नोवंक्षणतःप्राप्यफलकोशाभिवाहिनी॥ प्रपीड्यधम
नीर्वृद्धिंकारातिफलकोशयोः॥ दोषाश्रमेदोमूत्रांत्रैःसवृद्धिःसप्तधागदः॥ गुग्गु
लंरुबुतैलंवागोमूत्रेणपिबेन्नरः॥ वातवृद्धिंनिहंत्याशुचिरकालानुबंधिनी॥ सक्षीरंवा
पिबेत्तैलंमासमेरंडसंभवं॥ तैलंनारायणंयोज्यंपानाभ्यंजनबस्तिषु॥ त्रिफलाक्वाथगो
मूत्रंपिबेत्प्रातरतंद्रितः॥ कोष्ठवातोद्भवंशोफंनिहन्याद्वृषणोद्भवं॥ चंदनंमधुकंपद्म
मुशीरंनीलमुत्पलं॥ क्षीरपिष्टैःप्रलेपःस्याद्दाहशोफरुजापहः॥ पंचवल्कलकेसघृतेनप्र बकदा
लेपनं॥ सर्वपित्तहरंकार्यंरक्तजेरक्तमोक्षणं॥ वासर्षपतैलेनप्रलेपःशोफनाशनः
शिग्रु ३ नः॥ सर्षपवकसर्षपैःपिष्टैःशोफस्तेष्मानिलापहः॥ तिलमेरंडजंपीतंबलासिद्धपयो
न्वितं॥ आध्मानशूलोपचितामंत्रवृद्धिंजयेन्नरः॥ गोमूत्रसिद्धंरुबुतैलंच्चूर्णांदुग्धेन
कीसंधवसर्षयुक्तंखादेन्नरःकोष्णजलानुपाना न्निहंतिहद्धांविरजांत्रवृद्धिंगयंद्धतं

रसैंधवव्रुर्स्युक्तैः शंबूकभांडनिदग्धं प्रयत्नात्तू समाद मादित्यकारे विपक्वं निहंति कोरंड
मतिप्रहद्धिं॥ इत्यंत्रवृद्धिकुरंडकाधिकारः॥७॥ अथ पित्तिप्पूं दियुर्वल्लसेवनान्निचयं गलस्कंधा
तिग्रंथिवलोफं दाषोवृत्तणसंधिजगो॥ हर स्रलां गसांधंतं ब्रध्नमिति निर्दिशंति॥ मूलं बि
ल्व कपित्थयोररुलकस्याग्नेहृदंत्योदयोः श्यामास्नुतिक रंजशिग्रुकैर्दोविंध्रोषधरुत्कारं
ल्वेष्कायंथिकनथपंचलवणद्वाराजमोदास्विंतां पीतं कांजिकको ष्मनोयमधिकं ब्रसीश्रनं
ब्रध्नं जितान्नष्ट रेरंडतैलेन कल्कः पथ्या समुद्भवं रूत्ला सैंधवसंयुक्ता ब्रध्नरा
गहरं परं॥ त्रिवृत्क्षीरगोमूत्र सर्षपकुंदुरुक सर्वं प्रलेपितं सुरोष्णं स्यात् ब्रध्नरा
गहरं परं॥ इति ब्रध्नाधिकारः॥७॥ इति श्रीवीरसिंहावलोके मुष्कवृद्ध्यंत्रवृद्धिब्रध्नाधिकारः
॥७॥ ॥ अथ ज्योतिःशास्त्रारिमायाणां गलगंडगंडमालापचीरोगस्यादृक्मार्गीलन्स्र
तीकारं ते गंडोदराद्दिन्नाभागे: क्षितिपतिनाबंधनादिर्जिनः सप्तमस्थे कदृग्भा यां सूर्ये विधाति २००

हनं तावत्सु रुपशः अपरं वा शिलाकृगलगंडरोगाश्चित्रं सहसाद्वारः मूलं तप नदृशासी
यां शुक्रे दृष्ट्या भागे तावदरिजिः॥ शिरासु बालरोगेभ्यः हरातीसार सूलाक्षेः शरीरक्ले
शमात्मनो निसृष्यस्यांतर्गतलत्तृगोगो॥ अपरं वा॥ शिरारोगः रल याहोनाना क्लेशाविमर्दनं॥
लवा गंतक नयंध्याधि सुध्येस्यांतर्गत कुजो॥ शुक्रो नवर्तमानस्य यजनितगलगंडमाला
दिरोग प्रतीकाराया दिव्य प्रीतये याध्याकं सकलमपि कुर्यात्॥ तथा च सूर्यो नवृत्तमानस्य
कृजनितगलगंडमालापवातयेऽशुक्रोकोंका यैंःजन्यचाशुध्वीनः कुजजनितगल
गंडरोगप्रतीकाराद्यान्होमप्रीतये पणोकं कुर्यान्नेन शांतिः॥ गुरुदेवीपरविहृदः
रवकारीभुक्ती गंडमालाव्याधि मां शुजायते एतद्वादशयाप्युनि हितीं अपरं तत्रालक्षणं प्रता
र्पयोःशाखा पयतिक्षिप्यवृत्तकं वंचयिच्चायोधीनसगंडमाली भवति॥ अस्य प्रायश्चित्तं॥ स्त्रु
कुकृनिंः ह्रतिवाद्या नयर्णां कुर्यात्॥ एतन्मानवेऽभिहितं गंडमालागलगंडोपशांतये

चकृष्णकं॥ ऋषिछंदोदेवतानि ज्ञात्वैव जपेत्॥ यतः अविदित्वा ऋषिछंदोदैवतं यस्तु
मेव वा यो ऽध्यापयेज्जपेद्वापि पापीयान् जायते तु सः इति वचनात्॥ तस्मात् ऋषिछंदोदे
वतानि ज्ञात्वैव जपेत्॥ एतत्सर्वाधीतवेदब्राह्मणविषयं॥ अथ चांद्रायणब्राह्मणभोजनानि च
कारयेत्॥ अन्नदानं तथैव च॥ ७॥ अथ ज्योतिःशास्त्रानि प्रायेण रक्तार्बुदरोगग्रस्तस्य हे
तुमाह॥ तत्प्रतीकारं च॥ स्त्रीशोणितदोषं च रक्तच्छेदो व्रणश्चापि॥ पित्तसमुत्थे दोषे रजनि
हतो मानवो भवति॥ अथ यालोमदलाजनितार्बुदरोगग्रस्तप्रतीकारः तत्लोमप्रीतये स्वर्णेनोक्त
मिव सकलं कुर्यात्॥ तेनोपशांतिर्भवति॥ ७॥ अथार्बुदरोगस्य कर्मविपाके हेतुमाह॥
तत्प्रतीकारं च॥ पूर्वजन्मनि विधुरा साहं रम मालेः स रक्तार्बुदवान् भवति॥ विषवाग
मने नित्यं रक्तार्बुदादी जायते नरः॥ नारदीयवचनात्॥ रक्तार्बुदी नरः कुर्यात् प्राय
श्चित्तप्रशांतये॥ इति वचनात्॥ अ आति लघु चांद्रायणानि समस्तानि व्यस्तानि वा गुरुलघु १०१

नावापेक्षया समाचारेत्॥ सुवर्णदानं च दद्यात्॥ ब्राह्मणभोजनं कारयेत्॥ द्विषवापेश
याइति॥ ७॥ रक्तार्बुदप्रकरणं॥ अथ कर्मणा॥ प्राणानां गलगंडमालापची ग्रंथ्यर्बुदानां
च निदानं चिकित्सितमाह॥ काथविनिश्चयात्॥ निबद्धः श्वयथुर्यस्य मुष्कवल्लंबते गले म
हान्॥ वातादिवा कफो वा गलगंडं तमादिशेत्॥ यवमुद्गपटोलानि कटुरूक्षं च भोजनं॥ छर्दिः सर
क्तमुक्तिं च गलगंडे प्रयोजयेत्॥ निचुलं शिग्रुबीजानि शणबीजातसी यवान्॥ मूलकस्य च बी
जानि तक्रेण आम्लेन पिष्ट्वा येन गं जाति ग्रंथयश्च गंडमालाः समुत्थिताः॥ प्रलेपात्तेन नश्यंति
विलयं यांति वा चिरात्॥ जीर्णकर्कारुकरसो बिडलवणसंयुतः॥ नस्येन तरुणं हंति गलगं
डं न संशयः॥ जलकुंभीकजं भस्म पक्वं गोमूत्रगालितं॥ पिबेत्कोद्रवभक्ताशी गलगंडप्र
शांतये॥ श्वेतापराजिता मूलं प्रातः पिष्ट्वा पिबेन्नरः॥ सर्पिषा नियताहारो गलगंडप्रशांत
ये॥ त्रिकालां तुंबीफलं पक्वं सप्ताहमुषितं जलं मद्यं वा गलगंडघ्नं पानात्पथ्याभुजी लिनः॥

कर्कंधुकालामलकप्रमाणैः कक्षांसमन्यागलवंक्षणेषु॥ मेदःकफाभ्यां चिरमंदपाकैः
स्याद्गंडमाला बहुभिस्तु गंडैः॥ ते ग्रंथयः केचिदवाप्तपाकाः स्रवंति नश्यंति भवंति चान्ये
कालानुबंधं चिरमादधाति सैवापचीति प्रवदंति केचित्॥ माक्षिकाग्रं सलत्वीलंकाद्यावरु
णमूलकं गंडमालां निहंत्याशु चिरकालानुबंधिनीं॥ विडंगानि चलिसिं सं छ रास्नायाव्हारदा
रुणिः॥ तैलं च तुर्गुणे सिद्धं कटु० तुंबीरसैः श्रुतं॥ गंडमाला दरंध्रेष्टं गलगंडप्रशास्यते॥
तुंबीतैलं॥ व्यापंचविडंगं मधुकं सैंधवं देवदारु चा तैलमेभिः प्रियंसमकं लघुमप्यपचीं
त्रजेत्॥ व्योषाद्यं तैलं॥ छुछुंदर्या विपक्वं तु कर्णतैलं वरं श्रुवां॥ अभ्यंगान्नाशयेत्तूर्णं॥
गंडमालां सुदारुणां॥ छुछुंदरीतैलं॥ ७॥ शास्त्रांजनं देवदारु कांजिकेन तु पीषितं॥ कोलं
प्रलेपतो हंति अपचीं मपिडरस्तरां॥ नवकर्पासिकामूलं तंदुलैः सत्त्वपीषितं॥ पक्वापपलि
कारवादत्तु अपचीनाशमायताः॥ वातादयो मांसमसृक् प्रदुष्टाः संदूष्य मेदश्च तथा शिराश्च १०२

वृत्तोन्नतं ग्रंथिमरूकुसाखाः कुर्वंत्यतो ग्रंथिरिति प्रदिष्टाः॥ हिंस्रा सारोहिण्यमृतातबना
ग्री व्रपाना कविल्वागरुकृष्णवंगंधा॥ गोजीरपिष्टा सहतालपच्या ग्रंथीविधाया ग निलजे प्र
लेपः॥ जलायुकापित्तहिता स्नुहीनादनाभ्यां परिषेचनं चा शशाकरसेनेक्षुरसेन वा पाणिद्र
सैपिवेद्वापि हरीतकीनां॥ मन्थं कबंधार्जुनवेतसानां चश्लिः प्रमेहा नववारयेद्वा रुनेपुहोपि
स्रुययानुद्धर्वयं ग्रंथोलिपक्वे ऽस्मसमुद्धितेषु भिन्नस्य विशुद्धा ब्रणमेवकुर्यात॥ अंगुष्ठ
प्लानादपलवंषु दोडैः विकंकताक्षरग्वधकाकनंता काकादपीतापसवृक्षमूलैः॥ आलेपये
त्पिंडफलार्कनाग्रीकरंजकालामदानोवविद्वानू त्र्यधर्मजातं चा मनमच्यांत्तमप एकमेवा
पदारवदिर्यादटदेस्थिते वा मृजि सिद्धकर्मा सन्धुंतेतां कंच विविघ्र विधिदधातु॥ या मांस
कथः कविनाह्नहृत्य तास्थ्य प्रयोज्या अविधिर्विधिज्ञैः॥ शास्त्रेण चापाद्य सुपक्वमाशुः
प्रक्षालयेत् पथ्यनाम्नैः कषायैः॥ सोबाधने मूं च विशोधयप्यद्दारानारेणेन्द्रोदूतमुपाएदे॥

स्नुह्यर्कतैलं च वचा वारणीयं। विडंगपाठारजनीविपक्वं मेदःसमुत्थे तिलकल्कदिग्धं त्वचो
परिष्टाद्द्विगुणं पटानां कृत्वा शतं तेन घृतं प्रमृज्याल्लोहेन धीमानू दहन द्वितीया बलिपाटवी
मथलाक्षया वा। प्रततया स्वेदनमत्र कार्यं। निपात्य वा क्षारमपोह्य मेदो दहेत्स्रवपकं त्वथ
वा विदार्य प्राक्षाल्य मूत्रेण तिलैः सुपिष्टैः सुवर्चिकाद्यैर्हरितालमिश्रैः। सासंधिबंधमश्ना
ड्व तथ प्रगाढैः क्षारात्रारेनान मानि प्रशोथ तैलं विदध्यात् द्वि करंजयुग्मा वंशावलेपं गुडमू
त्र सिद्धं जीमूतकीकाससवर्तीफलैस्तु। दंती द्रवंती हरितास्तु तेव विसर्पिभिः स्नतं दंतापवी प्रह
ह्रां। द्विक्षप्रहवं तलड दारवीयं निर्गुंडि जातीवरूस्य कुकं जीमूतकं माक्षिक सैंधवाज्यं क
करुकेर्वल्लुकनालिकेरप्रियालुपत्रांगुलवीजङ्झार्षैः वातार्कदुग्धैः रक्तताम्रसिद्धैः केस्रुः
सा तैलेस्सप माद्दये ज्ञं कुर्यात्तु मुखान्नक्षपनादन्तानि। सिद्धैश्च मांसे रघवेसवारे। श्व
दं विदध्यात् क्रमशस्तु नाड्याः। शेषाणि रकं वजशोदार च वा तद्धनिर्मूढ पयोमलनावे। १०३

सिद्धं सिताढ्यं हविरं पिबेद्वा। श्वेतापनाढ्या मृदुवस्तु पथ्यो। पिन्नार्बुदकायविवारवनं वक्रि
या गोऽविरज्ञाकगोजीसमपत्रं तैरां क्षोद्रयुतं प्रलिंपेत्। ज्ञानदृस्तीतैः सर्जरसप्रियंगुप
त्रंगाराश्रों जयष्टिकापंकैः। विश्राद्यचारवंध सोमराजी त्रयामार्ग योज्या क्रमशालेन लपोश्या
मार्गिरिकर्णी ननिकारसेषु द्राक्षारसे समलिंग्मिकारसे वा घृतं पिवेन्नीलक संज्ञसिद्धं पि
तार्बुदं तजकरीवर्जंवा।। स्युद्रस्य जंतोः कफजेर्बुदे ज्वरक्तेजसिद्धनाना र्बुदं ततो द्रथा
एियन्द्दहे मधश्वस्त्रोपानूद्धरं तिनिःकाल्कसातेः प्रदिग्ध्यात्। काणिारपाराणत विर्मिडिश्रैः
सकाश्यपनीलिः स्युकलांग लादयैः स्रालेस्नुकाकानि मूलेमिश्रैः क्षारप्रसाद्दैरथवा प्र
दद्यात्तनि ष्पावकपिण्याक कुलत्थ काल्कैः मांसैः प्रगाढैः दधिमस्तुयुक्तैः लेपं विद
ध्यात् कृमयो यथात्र ह्यत्रत्रिंतं मुंचति च मक्षिका वा। स्नुष्टावाविशिष्टोल्झमिनिः ज्वलेर
लिखत्ततोग्निं विदधीत पश्चात्। ताम्रदर्भमूले त्रपुताम्रसीसपट्टैः समावेष्टतदायसे

स्य दारुगिरास्त्राव्य सत्तेच्छ दध्यात प्राणान दिंसनु त्रिषग्प्रमत्तः॥ आफेन ज्वालीकरवीरा
त्रैः कषायणिस्वेर्वणशोधनार्थे॥ स्नेहच तैलं विदधीत नागी विडंगपाठात्रिफलावृषकेर्यह
लयावोपगतानुपाको पाकमात्रेणापचरेद्विधिज्ञः॥ श्यामदोर्बुदं स्विन्न मध्यो विदार्य विशोध्य
सीव्यक्तरक्तमास्तु ततो हरिद्रागृहधूममारोप्य तं गब्रास्यैः समनःशिलालेः॥ व्रणप्र
तिरुत्तम स्तु प्रगाढकरंजातैलं विदधीत सिद्धं॥ हन्त्कः सशोषाणि यथा द्विवाक्तिः॥ अर्बु
दचिकित्सा॥ इति श्रीवीरसिंहावलोके गलगंडमालापचीग्रंथ्यर्बुदाधिकारः॥ ॥ ॥
अथ ज्योतिःशास्त्राभिप्रायेण श्लीपदरोगस्य हेतुमाह॥ तत्र तत्रीकारंचा॥ अकुलीनोपि
कलांशस्थपलोहेष्वथ जायते मनुजः सुखरा नित्यं श्लीपदी कजबुधचंद्रयुतनंदानेः सहितेः॥
आतोनशुधसूकवनित श्लीपद बाधासांतयेसार्वषां प्रागुक्तमेव कुर्यात्॥ ॥ अथ श्लीपद
रोगस्य कर्मविपाकेन हेतुमाह॥ तत्रादौ कारंचा॥ स्वगोत्रस्त्रीगामी स्यात् तयोन्यां च श्लीपदी भवेत्॥ १०४

त्रस्य प्रायश्चित्तं अस्य चाण्डायण नैकं चारताय यो कंक्ष यति ततदनु कन्येन स्वर्णं
दध्यात्॥ पुंसा ब्राह्मणभोजनं॥ ॥ अथ कर्मप्राप्तस्य श्लीपदरोगस्य सनिदानं चिकि
त्सितमाह॥ तत्र निदानस्याह॥ यः सक्षारावं त्वणजोन्त्रशालिविपाको नृणां पादगतः क्रमे
ण संश्लीपदी स्यात् करकर्णनेत्रशिश्नौष्ठनासास्वपि केचिदाहुः॥ लंघनं वमनं स्वेदास्त्रावने
रक्तमोक्षणे प्रायः श्लेष्महरैरल्पैः श्लीपदं समुपाचरेत॥ धत्तूरैरण्डनिर्गुंडीवर्षाभूशि
ग्रुसर्षपैः॥ प्रलेपः श्लीपदं हंति चिरोत्थमपि दारुणं॥ हिंसं वा लेपनं नित्यं चित्रको देवदारु च॥
सिद्धार्थकाः शिग्रुकं वापि स्त्रवोष्णे मूत्रपेषितं॥ मंजिष्ठां मधुकं रास्नां सहिंस्रां सपुनर्नवां
पिष्ट्वा वनाल लेपोयं पित्तश्लीपदशांतये॥ पलाशात्र लस्तु रसोपि वेधातैलेन उत्थं सितस
र्षपानां मूत्रेण पथ्यामरदारुविश्वं सगुग्गुलुं श्लीपदिभिर्निपेयं॥ त्रिफलाचित्रकदंतीनां कषम
र्धपलं पलं विंशति हरीतक्या गुडस्य उपलहृयोमधुना मोदकं खादेत् श्लीपदं हंति दुस्तरं॥

इति श्रीवीरसिंहावलोके स्त्रीपदाधिकारः ॥७॥ ॥ अथ ज्योतिःशास्त्राभिप्रायेण विद्रधिरोगस्य
हेतुमाह ॥ तत्प्रतीकारं च ॥ मध्ये पापग्रहयोश्चंद्रे मदनस्थितेऽर्कजे जातः । आसन्नया विद्रधिभिः
गुल्मप्लीहादिपीडा स्यात् ॥ अथ पापग्रहांतवर्तमानचंद्रजनितविद्रधिनाशाय चंद्रप्रीतये सर्वो
क्तमेव कार्यं ॥७॥ अथ विद्रधिरोगस्य कर्मविपाके हेतुमाह ॥ तत्प्रतीकारं ॥ विद्रधिः फलहर्ता
स्यान्मनुष्यो ब्राह्मणस्य तु । वक्ष्यामि तत्प्रतीकारं दानाद्यमादितः स्मृतः । यथाविभवतो वापि
=आम्रहर्ता ९ कुर्याद्धेमतरं शुभं । स्निग्धं ताम्रेव ताम्रपात्रैः सर्वतः संस्कृतं शुभं । श्वेतवस्त्रेण संवेष्ट्य फ
लैरपि शुभकल्पितैः । गंधधूपाद्यैः समभ्यर्च्य तंडुलोपरि विन्यसेत् । तंडुलानां प्रमाणं द्रोणेन
नोक्तं तु दर्शयंतः दर्भमथवा ग्राह्यं यथाशक्तिवतां नरः । आचार्याय विधिज्ञाय सर्वशास्त्रार्थतत्ववि
दे धर्मज्ञः सत्यवादी सत्कुलीना लोकसंमतः । आचार्यपत्न्या सहिताय तेन ह्रद्गादि कारयेत् । वन
स्पतिरसं नयेत्पात्रया मृजनादिको । आग्नेय्यां दिशि होमः समिदाज्यतिलैर्दत्तैर्मंत्रैश्च शास्त्र १०५

तोक्त्यादातावृत्तविज्ञायाचितः । तिलहोमो यथाकृति तिरस्कृतान्नरसस्त्रं कांयाद्वा इति मंत्रेणाग्नौ
होमः प्रवर्तयेत् ॥ ग्रहशांतिः कर्तव्या गृह्योक्तविधिना ततः कृत्वा तु संस्रवं पात्रे पात्रेण स्व
नि निक्षेपयेत्तां तास्थवविद्रधिर्व्याधि व्याधितस्य च यत्नतः । अग्ने रुत्तरतो भागे नकलशस्य स्था
पनं तत्वे तो नद्यास्नानोपविष्टाय अभिषेकं च कारयेत् । ततः शुक्लांबरधरः शुक्लगंधानुलेपनः
शुक्लमात्यं हस्तेनं प्रदद्यात् प्राङ्मुखाय च । गंधैर्वस्त्रैः पूजितायाराग्नीस्वयंभुहुम्र स्वः आ
म्रवेव ब्राह्मणस्त्रहुः सर्वेप्राणिहिताय स्त्रहाणामादिभूतं तत्खु देवानांप्रीतिवर्द्धनं फलावा
प्त्येण यस्मात्सांवे ह्रूपं सर्वजन्मजं । सोवर्णस्तिदानेन तुष्टाः सर्वाश्च देवताः ॥ विद्रधिः न रा
शं कुबालमाभ्यंतरं तथा । विनाशाय तु सकले स्वस्थं कुर्वे तु सर्वदा । एवं दत्वा तु तद्दानमा
चार्याय तिलकितः । रपाने शतपदं दत्वा प्रणिपत्य विसर्जयेत् । अन्येभ्यो ब्राह्मणेभ्यश्च दद्या
त्प्रदानं यानदक्षिणां ब्राह्मणान् भोजयित्वा तु स्वयं भुंजीत बंधुभिः ॥ इति विद्रधौ आम्रदानविधिः ॥९॥

अथ कर्मविपाकस्य विद्रधिरोगस्य सनिदानं चिकित्सितमाह ॥ रुधिन्निस्रयातो व गुरुकर्मा समे
दास्थिप्रदुष्टास्थिसमाश्रिता गा दोषाः शनैः शनैः घोरं जनयंत्युच्छ्रिता भृशं महामूलं रुजा
वंतं वृत्तं वाप्यथवायतं ॥ स विद्रधिरिति ख्यातो विज्ञेयः षड्विधश्च सः ॥ पृथग्दोषैः समस्तैश्च
तेनापि क्षतजेन तथा ॥ अंतःप्रपमाणो गुल्मस्य विद्रधिस्तु ततः परं ॥ गुल्मस्तिष्ठति गुल्मेषु विद्रधिर्मां
सशोणितो ॥ विद्रधिः पच्यते तस्मात् गुल्माख्यान विपच्यते ॥ आश्मनवधर्सं त्वगकादीह
स्फोटपाचितां रुजां ह्यासमाप्य द्वैकं विद्रधिं नश्राये न्नरः ॥ हंदसंग्रहात् ॥ जलौकःपातनं त्वा
स्तं सर्वस्मिन् एव विद्रधौ ॥ मृदुर्वीरकोलबिल्वमस्वेदःपितां तरविना ॥ वातघ्नौषधकल्केषु व
सातैलघृतहुतैः स्तु रवो ह्मोबद्धलोपेतः प्रयोज्यो वातविद्रधौ ॥ स्वेदोपनाहः कर्तव्यः
शिग्रुमूलसमन्वितैः ॥ यवगोधूममुद्गैश्च सिद्धपिष्टैः प्रलेपयेत् ॥ विलीयते क्षणेनेव अ
पक्वश्चेव विद्रधिः ॥ पैत्तिकं शर्करालाजामधुकैः सारिवायुतैः ॥ प्रदिह्यात्क्षीरपिष्टैर्वा १०६

वयस्योशीरचंदनैः ॥ पिबेद्वा त्रिफलाक्वाथं त्रिवृत्ताकल्कसंयुतः ॥ इक्षिकासिकतालोहगोत्रा
सतुषपांशुभिः ॥ गोमूत्रपिष्टैः सततं स्वेदयेत श्लेष्मविद्रधिं ॥ शोभांजनकनिर्यूहो हिं
गुलसैंधवसंयुतः ॥ अचिराद्विद्रधिं हंति प्रातः प्रातर्निषेवितः ॥ श्वेतवर्षाभुवोमूलं मूलं च वरुण
कस्य वा जलेन क्वथितं पीतं अपक्वं विद्रधिं जयेत् ॥ कासीसं सैंधवशिलाजतुहिंगुरसैर्मिश्री
तेन वरुणवल्कलजंकषायः अभ्यंतरोत्थमपक्वमतिप्रमाणं न्हणामयं जयति विद्रधिमु
ग्रशोफं ॥ अपक्वे चैव उद्दिष्टं पक्वे तु व्रणवत्क्रिया ॥ इति वीरसिंहावलोके विद्रधिचिकित्सा ॥०॥
॥ ॥ अथ कर्मविपाकस्य शोफव्रणरोगस्य उत्पत्तिःश्रुतानि प्रायेण ह्युक्तमाह ॥ तस्य
टीकारेव ॥ या ध्याकं जातकौ ब्रणितां गः स्त्रीलोलः अघोरः कांत सुसंभवत्स्त्रीणां ॥ नो मश
शांकस्य राहुरेकाले चेंडरोषयी ॥ नोमदशायामपि ब्रणो क्षवइतिदर्शनात् ॥ अन्यच्च
त्कोमारशेरमा शांदे मालंकारत्रषिने प्राज्ञं श्मरं सव्रणगात्रं रुधिरांगनिरीक्षितो जीवन्

न्न स्तुत राचिस्तु रयुरुसंयोगजनितव्रणवेदनाविनाशाय गरुडप्रीतये सर्वोक्तमेव जप
होमदानादिकं कार्यं ॥ नोमविलोकितगुरुवनतव्रणशांत्यै गरुडपूजादि सर्वोक्तमेव
कार्यं ॥ ७ ॥ अथ कर्म्मविपाके रुद्रमाहा ॥ जलाग्निकाष्ठबंधनादिनिमित्तेन योम्रियेत स्व
दरव्रणी भवति ॥ गोद्वयं दद्यात पंचाशद्ब्राह्मणभोजनं कारयेत् ॥ दक्षिणां च प्रदद्यात् ॥ त
था वत्सविपानादति क्रोधादति स्नेहाद्भयादपि ॥ यो धर्म्मनिश्चयं जानन्नन्यथा कुरुते
उसः ॥ सस्यत्राणित सव्रणी भवति मानवः ॥ तत्त्वशांतये नुतलक्ष्वं प्रकुर्यात् ॥ तिल
प्रस्थदानं वतिं ॥ दन्तजिप्तितिलैर्घृताक्तैर्निरष्टोत्तरसहस्रं कुर्यात् ॥ ब्राह्मणभोजनं च
कारयेत् यथावत् ॥ महाफल तस्करपादव्रणी भवति ॥ तथा वो यश्चांडालादिवचनं श्रुणुत
स्वयं भुंक्ते ॥ सपिंडो ह्येकादूर्णवान्भवति ॥ सहस्रात्रिं तत्र लक्षं च कुर्यात् ॥ यथाविभवं तिला
न्दद्यात् ॥ सर्पिर्मिश्रं घृतं चाष्टोत्तरशतं होमं कुर्यात् ॥ यद्दुक्तं यमसूक्तेन विप्रेंद्रस १०७

पिंडाम्बुसंयुक्तं जुहुयात् अष्टोत्तरशतं यमप्रीतये हि ॥ इति पित्रोद्रेके विधिः ॥ ७ ॥ पलेन
वत्सदान्नदर्धार्द्धेन वा स्वनेः कारयेद्वाहनं हेमं चतुर्दतं च वारुणं ॥ दंताः स्वर्णमयाः
कार्याः रत्नैर्नानाविधैः शुभैः ॥ सर्वाभरणसंयुक्तं करिणं वोपकल्पयेत् ॥ यत्र सर्वं प्रदद्यं
हितस्य पार्श्वे समाहिताः ॥ निदध्याद्विधिवन्प्राज्ञः सर्वव्रणविमुक्तये ॥ उपचारैः षोडशा
भिरर्च्य यजं धनुष्याकैः ॥ ततो ब्राह्मणमाहूय सर्वशास्त्रार्थकोविदं कृतहन्नोपसंयमं
मनुद्वेगकरं स्वर्णो भक्त्या संपूज्य वस्त्राद्यैर्द्दीर्मां तनव कारयेत् ॥ मंत्रैः पौराणिकैः स
म्यक् संहिता शास्त्रकोविदैः ॥ चत्वारो दिग्गजा येत उष्टदंतादयश्च ये सार्वभौमादया
स्यवाश्चाजन्यातास्य यामिता ॥ समिद्रा ज्योतिलोद्गमो गजस्य प्रीतये भवेत् ॥ तस्मै ऊ
तवत्ते सम्यक् ब्राह्मणीप्रीत्यर्थं माहतः ॥ मंत्रेणानेन विधिवद्दद्याद्भक्तिसमन्वितः ॥ प्रा भु
खः सवर्णीत हस्तमुखो ये द्रस्यवाहनं ऐरावतश्चतुर्दंतो गजानां नायकः स्वयं ॥ दिग्दंति

नांत्र न्यस्थंतामाव्रणेत्त्रप यत्तप्रसुः॥ अनेतरम नुव्रज्य नमार्यं नुदाम्बिनः॥ ब्राह्मणानु
जोजयित्वाव स्वयं भुजीतवाग्यतः॥ एवं कृते व्रणव्याधि स्तत्क्षणादेव नश्यति॥ विंशादर्दिव्रणे
त्रिर्दिनं कार्यमाराध्यदेवतं॥ इतिसर्वव्रणभूमगज्ञदानविधिः॥ परव्रतनेदी व्रणकीलकी
त्पत्तिसत्वकं तत्वावायसंदघात्॥ चर्मकीलकव्रण रागो सशोफे सनिदानं विकि
त्सितमाह॥ रुग्विनिश्चयात्॥ एकादोषाच्छिन्नः शोफो व्रणानां पूर्वलक्षणं॥ षड्विधस्य
पृथक्सार्वदोषास्त्रागंतुजेस्तथा॥ शोफाः षडेते विज्ञेयाप्रागुक्तैः शोफलक्षणैस्तयो
विनाशः कथ्यतेतेषां पकापक्वविनिश्चय॥ विषमं पच्यतेवानात्विन्निकृष्णावि र्वविरानी
कफजः पित्तवक्षोकोरकजंतु सम्भवः॥ मंदोष्मतात्त्वचो फचैं काठिन्यं चकसवर्णता
मंदावदनतानेव शोफानामादितलक्षणं॥ नर्तनिला रुज विनाचपित्तंपाककफंचा
पिविनानत्रयं तस्मात्सर्वं परिपाककालेदोषैस्त्रिभिर्यौतिगदाविपाक॥ कत्वंसमा १०८

साधयायेव वक्रिवाद्यीरितः संप्रदहति वसत्वातायेवस्थयो ह्यविनिरुद्धोहि मांसं वि
राशुत्रा खुरखादतीह॥ आदौ विम्लापनं कुर्यात् द्वितीयमवसेचनं॥ तृतीयमुपनाहंस्त
उर्थं पाटनक्रिया॥ पंचमं शोधनं कुर्यात् षष्टं रोपणमिष्यते॥ एतत्क्रमाद्व्रणस्योक्ताः स
प्तमं वैकृतापहं॥ अन्यन्यश्चेदयिचात उवेष्टुनाख्या स्ततः शानैः॥ विस्रावनार्थं स्तद्दीयात्त
लेनां ग्रुष्टमेववारक्तावसेचनं कुर्यात् आदावेव विसर्जनं॥ त्राणिलेमर्दनि संरवेवे
दनाचतिवाव्रणायोनयाति शमेलेपैः स्वेदसेकाचलर्णाणैः॥ सोपिनाशं व्रजत्याशु शोफः
त्राणिनमोक्षणान्॥ एकतस्याक्रियाः सर्वा रक्तमोक्षणमेकतः॥ रक्तंवविक्रियांयातितस्य
नाल्लिरुक॥ दरत्वसोग्रुलंतुंबी श्टंगं वह्नादशांगुलो॥ शिरःसर्वांगजं रक्तं जलोकायंथि
गुह्यत्तो तुंबीकफोष्ठेवातोछेश्टंगं मीपित्वेजलोकसः॥ सन्निपातोछितेनाडींबजुत्वोषि
प्रयोजयेत्॥ मातुलिंगाग्निमंथो वश्वरदारु माहोषधं॥ हिंस्राविवरान्नावप्रलेपा

वातशोफजित्॥ दूर्वा नलकमूलं च मधुकं चंदनं तथा॥ शीतलैश्च गणैः सर्वैः प्रलेपः पित्तशोफहा॥
न्यग्रोधोदुंबराश्वत्थप्लक्षवेतसवल्कलैः॥ ससर्पिष्कैः प्रलेपः स्यात् शोफनिर्वापणः परः॥ अजगं-
धाश्वगंधा च काला सरलया सह॥ एकैषिका च शृंगी च प्रलेपः श्लेष्मशोफहा॥ नगात्रोलेप-
नं दधातूरक्तं बपातयेत्॥ नयानवपर्युषितं शुष्कं मानं लानेव धारयेत्॥ सतिलासान्सौवीराक्षस्नं
सक्तुपिंडिका॥ सकिण्वकुष्ठलवणाः शस्ताः स्फरूपनाहने॥ शणमूलकशिग्रूणां फलान्यसि-
तसर्षपाः॥ सक्तवः किण्वमुस्तानि द्रव्याण्येतानि पाचने॥ हस्तिदंतं जलेघृष्टं बिंदुमात्रं प्रलेप-
नात्॥ अत्यर्थकठिने वापि शोफे पाचनभेदनं॥ चिरबिल्वाग्निको दंती चित्रको हयमारकः॥ कपोत-
कंकगृध्राणां पुरीषाणि च दारुणं॥ यावंति क्षारद्रव्याणि क्षारा वा दारुणं परं॥ ततः प्रक्षालने क्वाथः
पाटलीतिंबपत्रजः॥ आलेपः शमितो मांसानां मांसस्थानामरोहतां॥ कल्कः संरोहणः कार्यस्तिला-
नां मधुनान्वितः॥ निंबपत्रमधुभ्यां तु युतः संशोधनः स्मृतः॥ निंबपत्रं तिलादंती चित्रको हयमारकः॥

दुष्टव्रणप्रशमनो लेपः शोधनकेसरी॥ मधुयुक्ता गिरः संघा सर्वव्रणप्ररोहणी॥ व्रणान् संशो-
धयेद्वर्त्या कृत्वा संधिमर्मगान्॥ अनया त्रिवृता दंती लांगली मधुसैंधवैः॥ स्नुग्रवी पत्रधेरक-
सैमाटकारतिकाः॥ इयगेने प्रलेपन गंभीरव्रणरोपणः॥ पंचवल्कलकल्कैर्वा सूक्ष्मैर्वा ससि-
मधुतैः॥ धातुकीलोध्रचूर्णैर्वा तिलपारोहति व्रणः॥ निंबपत्रवचा हिंगु सर्पिर्लवणसैंधवैः॥ धू-
पनं कृमिरोगघ्नं व्रणकंडूरुजापहं॥ अग्निदग्धे व्रणे सम्यक् प्रयुंजीत चिकित्सकः॥ पित्तविद्रधि-
वीसर्पशमनं लेपनादिकं॥ वातादिभिः कृतानूसास्तांश्च सर्पाय ग्रवेदनान्॥ यवाज्ययष्टिजैर्मदन-
श्रीवेष्टकस्तु राह्मायैः॥ करंजारिष्टनिर्गुंडीरसो हन्यात् व्रणस्थमीनूलस्तुनेनाथवा दधातु लेपनं
कृमिनाशनीय ह्येवदपाकस्तु गंधवं ताद्व्रणामहांतः स्पृजः सादाफः॥ ज्यायंतिते गुग्गुलुमिश्रि-
तेन पीतेन शांतिं त्रिफलारसेन॥ इति त्रिफलागुग्गुलुः॥ ०॥ जाती निंबपटोलपत्रकटुकादार्वी
निशा सारिवा मंजिष्ठा भयसिक्थ तुत्थ मधुकैर्नक्तालबीजैः समैः॥ सर्पिः सिद्धमनेन सूक्ष्मव-

दनाममर्माश्रिताश्चविषोपसृष्टाः स कष्टो व्रणः सगलिकाः शुद्ध्यंति राद्देति चा॥ आत्पाद्यं हुत्ता॥७॥
मनःशिला समंजिष्ठा सलाक्षा रजनीद्वयं। प्रलेपः सघृतः क्षौद्रः त्वग्विशुद्धिकरः परः॥ अयोरजः स
कासीसं त्रिफलाकुसुमानि च। प्रलेपः कुरुते कार्ष्ण्यं सद्य एव नवत्वचि॥ कालीयकफलत्वास्थि
हेमकालासारा ह्वामिः। लेपः सगोमयरसः सवर्णकरः परः॥ इति शोफव्रणचिकित्सा॥७॥ सद्यः
क्षतं व्रणं वैद्यः सशूलं परिषेचयेत्। यष्टीमधुकयुक्तेन सर्पिषा मात्रिके णतुोनवागं तु व्रणं
एवं घोह्यतः क्षौद्रसमन्वितं। शीता क्रिया प्रयोक्तव्या पित्तरक्तोष्मनाशनी॥ आमाशयस्थे रुधिरे
वमनं पथ्यमुच्यते। पक्वाशयस्थे देयं च विरेचनं च सम्मतं॥ क्वाथं वंशत्वगेरंडश्वदंष्ट्राश्मभि
दात्कृतं सहिंगु सैंधवः पीतः कोष्ठस्थं स्रावयेदसृक्॥ यवकोलकुलत्थानां निःस्नेहेन रसेन
वा भुंजीतान्नं यवागूं वापि बांसैंधवसंयुतां॥ इति सद्योव्रणिकः प्रोक्तः सद्यो व्रणहितो विधिः॥
समाहात्परतः कार्या शारीरव्रणवत्क्रिया॥ व्रणेष्वपि चैषु रयासाम्नवरागश्च जागनात्॥ तोय

रुक्क्रियास्वापातु नेव हस्तस्पर्शमैथुनात्॥ इति सद्योव्रणचिकित्सा॥७॥ आदौ भग्नं विदित्वा तु सेच
येच्छीतवारिणा। पंकेनालेपनं कुर्यात्ततः॥ आलेपनार्थं मंजिष्ठा मधुकं चाम्लपेषितं। शतधौत
घृतोन्मिश्रं शालिपिष्टं च लेपनं। न्यग्रोधादिकषायस्तु सुशीतं परिषेचनं। पंचमूलीविपक्वं तु क्षी
रं दद्यात्सवेदने। सुखोष्णमवचार्यं वा चक्रतैलं विजानता॥ गृष्टिक्षीरं ससर्पिष्कं मधुरौषध
साधितं। संधितश्चेत्र माक्षीकं पिबेत् क्षीरेण मानवः॥ मूलं शृगालविन्नायाः पीत्वा मांसरसेन तु॥
नभ्रमीकृत्य सप्ताहात् अस्थिभंगमपोहति॥ आभाबर्समधुयुतं अस्थिसंगदं पिबेत्॥ पीवा
चास्थिलवन्ध्यक वज्रसारनिस्तं दधं। लवणं कटुकं क्षारं अम्लं मैथुनपानकौ। व्यायामं न च से
वेत न भग्नोद्भवान्नमेव वा॥ इति भग्नाधिकारः॥७॥ यः शोफमाममतिपक्वमुपेक्षते ऽज्ञो यश्वा
व्रणं प्रचुरपूयमसाधु वृत्तः। अभ्यंतरं प्रविशति प्रविदार्य तस्य स्थानानि पूर्वविहितानि ततः स
पूयः। तस्यातिमात्रगमनाद्गतिरित्यतश्च नाडीव यद्वहति तेन मता तु नाडी॥ नाडीनां गतिमन्विष्य

त्राशस्त्रेणोत्पाद्य कर्मवित्॥ सर्वव्रणक्रमं कुर्यान्नाडीसाधनं रायणादिकं॥ नाडीव्रातघ्नं साध्य पाटि
तां लेखयेद्भिषक्॥ प्रत्यक्पुष्पीफलयुतांस्तिलान्पिष्टैः प्रलेपयेन्नुत्पत्ते त्रिकी तिलमंजिष्ठा नागदं
ती निशाद्वयैः॥ श्लेष्मकीं तिलयष्ट्याह्वनिकुंभारिष्टसैंधवैः॥ श्लेष्मघ्नं तिलमध्यात्त्वालेपयेद्वि
त्रशोधनी॥ शस्त्रघनिशाकालेन्द्रवारुणीज्याह्वा दूषसंयुता॥ सूत्रवर्तिश्चूर्णयोज्या शोधनी गतिनाशि
नी॥ वर्तीरतं माक्षिकसंप्रयुक्तां नाडीव्रणघ्नं कलवणोत्तमंच दुष्टव्रणेय द्विदिनं च तैलं तत्रे
व्यमानं गतिमाशुहंति॥ जात्यर्कशम्याककरंजदंती सिंधूच्छसौवर्चलयावशूकैः॥ वर्तिः क्षता
हंत्यचिरेण नाडीं स्नुक्क्षीरपिष्टा सह सैंधवेन॥ गुग्गुलुः त्रिफला व्योषैः समांशैराज्ययो
जितैः॥ नाडीदुष्टव्रणं वास्तु भगंदरविनाशनं॥ समूलपत्रां निर्गुंडीं पीडयित्वा रसेन तु॥ तेन
सिद्धं समं तैलं नाडीदुष्टव्रणापहं॥ इति श्रीवीरसिंहावलोके नाडीव्रणाधिकारः॥ ०॥ ॥अथ
भगंदररोगस्य ज्योतिःशास्त्रानिदानं येनहेतु माहात्म्य टीकारं च॥ यथोक्तं जातके॥ कष्टभ १११

गंदररोगो रक्तिच्छते श्वस्य जीविते निधानशालो सर्वारिष्टविहीनं जनयति कितवं सदा दुष्टं॥
अपरं च॥ रोगे भगंदराद्यैः संततं सर्वभुक्तिः सहविरुद्धः॥ कर्कटके दिननाथे सोमेन निरीक्षिते
विभुतं॥ अन्यच्च॥ कष्टकं द्विविकोणस्य दृष्टं यक्कष्ट भगंदरेः गजादिवाहनत्रयं तवे वे ज्ञातगेंद्रुवे
अथ प्रथमश्लोके ज्ञानेश्वरपठितत्वात्तृतीय अष्टमस्थानस्थ शनिजनित भगंदररोगबाधोपशां
तये शनिप्रीतये सर्वात्मेव जपहोमादिकं स्नानं सकलमपि कुर्यात्॥ तथान्यत्र कर्कटराशि
स्थितेन सोमावलोकितेन रविणा जनित भगंदररोगोपशमाय रविप्रीतये सर्वात्मेव जपहोमादि वि
रचयेत्॥ तथान्यत्र वेद्ददर्शनोतर्वर्तमान बुधजनित भगंदरोपशांतये चंद्रस्य सर्वात्मेव कुर्यात्॥
तेन उपशांतिर्भवति॥ ०॥ अथ भगंदररोगस्य कर्मविपाके हेतुमाहात्म्य टीकारं च॥ प्रव्रज
न्म निरर्थक च मर्म निश्चयार्थं तु राहितः॥ प्रव्रजितः सन्प्रतिगृहीवा यायावद्धर्मननिष्ठिनो लि
सन्भगंदररोगवान्भवति॥ तत्र कर्मादिविवादे॥ यो गृहीत्वा द्विजो मोहात्त निर्मुक्तोथ मर्मनिश्चये॥

भगंदरा भवंत्यस्य अधर्मं च दशो ... सहिरण्यं पंचरत्नं च दत्त्वा निष्कामिं ब्राह्मणेभ्यो भो

जनं च दद्यात्॥ ततो रोगात्प्रमुक्तो भवति॥ कृष्णात्रिणां मध्ये वापि पंचपुराणे॥ आत्मार्थं तु यो गम

नो भगंदरयुतो भवेत्॥ यथाह वृद्धबोधायनः॥ गोमेदमुक्ता माणिक्यं पद्मरागं च वज्रवैडूर्यमे

व वा मौक्तिकं पुष्परागं च सम्यक् मरकतं तथा॥ हरिद्रं च नव प्रमाणानि स्वर्णपत्रोपरि न्यसेत्॥ अथ

वा राजते ताम्रे ग्रहान् मंत्रैः प्रपूजयेत्॥ नवग्रहाणां प्रीत्यर्थं ब्राह्मणान् निमंत्रितं गुरोगंधपुष्पा

दिभिर्धूपदीपनैवेद्यैस्तान् प्रपूजयेत्॥ स्वलिंगाद्यैश्च मंत्रैश्च होमः कार्यो ग्रहस्य वता ग्रहयज्ञा

क्रमार्येण तत्पर्थः॥ ततो ब्राह्मणमाहूय सर्वशास्त्रार्थकोविदं॥ आदित्यादि ग्रहाः सर्वे नवर

त्नप्रदानतः॥ विनाशयंतु मे दुष्टं क्षिप्रमेव भगंदरं॥ अनेन कर्मणा ... तं यथावद्विधि

नोद्भावारा नीरुजः ... नोति निःसंदेहं भगंदरी॥ इति भगंदरे नवरत्नदानविधिः॥ ७॥ अथ कर्म

... भगंदररोगस्य सनिदानं चिकित्सितं ... निश्चयात्॥ गुदस्य द्व्यंगुले देशे

११२

पार्श्वतः पिडकार्त्तिकृत्॥ भिन्नो भगंदरो ज्ञेयो स च पंचविधो मतः॥ कटीकपोला निस्तोद

दाहकंडूरुजादयः॥ भवंति पूर्वरूपाणि भविष्यति भगंदरे॥ दूषणमनयोर्मार्गः प्रदेशा

भगवत्स्थले॥ भगं च दारयन्यस्मात् भगंदर इति स्मृतः॥ वातमूत्रपुरीषाणि क्रमयः शुक्रमेव वा भ

गंदरा भवंत्यस्य नाशयंति त मातुरी॥ अथ तद्वत् संप्रदानं॥ गुदस्यांच यथुं दृष्ट्वा विशोध्य शोध

येत् ततः॥ रक्तावसेचनं कार्यं यथा पाकं न गच्छति॥ वटपत्रेष्टिकाशुंठीगडूचीः सपुनर्नवा॥

सुपिष्टा पिटकावस्थे लेपः शस्तो भगंदरे॥ पिटकानामपक्वानामपतर्पणपूर्वकं॥ कर्म कुर्या

द्विरेकांतं भिन्नानां वक्ष्यते क्रिया॥ त्रिवृत्तिलानागदंतीमंजिष्ठा सह सर्पिषा॥ उत्सादनं भवेत्कि

युक्तं सैंधवक्षौद्रसंयुतं॥ रसांजनं हरिद्रे द्वे मंजिष्ठा निंबपल्लवाः॥ तैलं घृतं वा तत्पक्वं भगं

दरविनाशनं॥ मधुतार्कदुग्धदार्वीभिः वर्त्तिः ... विचक्षणः॥ भगंदरगतिं ज्ञात्वा क्षारयेत्तां

विचक्षणः॥ कुष्ठं सर्वशरीरस्थानां नाडीव्रणानां न संशयः॥ तिलाभया कुष्ठमरिष्टपत्रं निशा

वचारात्रमगारसमशस्तगंदरनाशकः पदंशयोश्च कुष्ठलेशोधनं लापणोथ्यों त्रिफलारसस्य
मुक्तंबिडालास्थिप्रलेपनं। भगंदरं निहंत्याशु दुष्टव्रणहरं परं। सुवीर्यवीलांगलिनीहरिताल
सुवर्चिकां। ज्योतिष्मतीरसं कृत्वा तैलं धीरा विपाचयेत्। एतद्धि स्यंदनेनाम तैलं भगंदर
रोगनाधने रोपणं स्वेवदुष्टनाडीव्यपोहति॥ करवीरनिशादंतीलांगलीलवणानि त्रिश्च मात्र
लिंगार्कपयसा पचेत्तैलं भगंदरे॥ करवीराद्यं तैलं॥७॥ व्यायामं मैथुनं युद्धं पृष्ठयानं गु
रूणि च॥ संवत्सरं परिहरेदुपरूढव्रणो नरः॥ इति वीरसिंहावलोके भगंदराधिकारः॥७॥ ॥
अथ क्रमप्राप्तयोरुपदंशशूकरोगयोर्योनिः शास्त्रांतरप्राये हेतुमाह॥ भ्रतीका
रं च॥ यथोक्तं जातके॥ अंतर्दशायां सितस्य शनितोयदा भवति॥ भवदभानसिद्धरोगैः
सह भवति च कामलोरोगः॥ अथस्तु कर्द्दशावर्द्धमानत्वं गतनि तोपदंशशूकदोषोपशां
तये चंद्रप्रीतये दानं लोकेमेव कथ्यते॥७॥ अथोपदंशशूकरोगयोः कर्मविपाके हेतुमाह॥ १२३

भ्रतीकारं च॥ मात्रगामी भवेद्यस्तु लिंगं तस्य विनश्यति॥ तस्य प्रतिक्रियां कर्तुं लिंगं सुंदर
तान्यसेत्॥ कृष्णवस्त्रसमाछन्नं रक्तमाल्याविभूषितं। तस्योपरिष्टेन कांस्यपात्रे देवं धन
श्वरं स्वर्णनिष्ककर्षेण निर्मितं नरवाहनं। यजेत्तु रूपस्तकेन धनदं विष्णुरूपिणं। अथ
र्ववेदविप्रेण अधर्वाणं समापयेत्। सुवर्णपुष्पिकां तु चानिष्कविंशति संख्यया। दद्याद्विप्रा
य संप्रत्यनिष्कं पथ्यमिति च कथनो। निधीनामधिपो देवः शंकरस्य प्रियः सखा॥ सौम्याशा
धिपतिः स्वामी मम पापं व्यपोहतु। इमं मंत्रं समुच्चार्य आचार्याय यथाविधि॥ दद्याद्देवं ध
नदं तु लिंगनाशोत्तु सिद्धये। इत्युपदंशशूकरोगहराधनदानविधिः॥७॥ अथ क्रम
प्राप्तस्योपदंशस्य शुकायाः सनिदानं चिकित्सितमाह॥ रुग्विनिश्चयात्॥ हस्ताभिघातात्
न्नखदंतघातादधावनादत्युपसेवनाद्वा। योनिप्रदोषाच्च भवंति शिश्ने पंचोपदंशा वि
विधोपचारैः॥ हंद्रसंग्रहात्॥ स्निग्धस्विन्नस्यात्तेनपादो वा जमध्ये शिरायधं जलौकःपात

नं च स्यात्तयद्वाथशोथलंबयाः॥ प्रकारः प्रयमेन शामद्वेप कारादिसः॥ पटोलनिंब
त्रिफलागडूचीकाथेः खदिरासनाभ्यां स गुग्गुलं वा घृतावयुतं वा सर्वपिदंशाप
हरः प्रयोगः॥ त्रिफलायाः कषायेण भृंगराजरसेन वा व्रणप्रक्षालनं कुर्यादुपदंश
प्रशांतये॥ दाहकषायेदाहे त्रिफलां समांशां मधुसंयुतां उपदंशप्रलेपोयं स घोरे
ह्यति व्रणाः॥ जपाजात्यश्वमारार्कशम्याकानां दलैः पृथक्कृतं प्रक्षालनं कार्यं मे
ढ्रपाके प्रयोजयेत्॥ करंजनिंबार्जुनशालजंबूवटादिभिः कल्ककषायसिद्धं सर्पि
र्निहन्यादुपदंशदोषं सदाहपाकं स्रुतिरागयुक्तं॥७॥ इति श्रीवीरसिंहावलोके उप
दंशाधिकारः॥७॥ ॥ अथ कर्मविपाकस्य शूकदोषस्य सनिदानं चिकित्सितमाह॥
